International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 125-127
© 2020 IJSR
www.anantaajournal.com
Received: 04-05-2020
Accepted: 06-06-2020

**डॉ. जितेन्द्रकुमार दाश**
संस्कृतविभाग: अभिमन्यु सामन्तसिंहार उच्चमाध्यमिकविद्यालय:, वालिआ, याजपुरम्, ओडिशा, भारत

**Corresponding Author:**
**डॉ. जितेन्द्रकुमार दाश**
संस्कृतविभाग: अभिमन्यु सामन्तसिंहार उच्चमाध्यमिकविद्यालय:, वालिआ, याजपुरम्, ओडिशा, भारत

# कालिदाससाहित्ये पर्यावरणम्

**डॉ. जितेन्द्रकुमार दाश**

## प्रस्तावना

'पर्यावरण' शब्द: 'परि' तथा 'आवरण' इति पदद्वयेन निष्पद्यते। अत एव परित: आवरणं पर्यावरणम्। प्रायेण संस्कृतसाहित्ये पर्यावरणार्थे 'प्रकृति' पदं व्यवह्रियते। 'परिवेश' इति शब्दस्यापि पर्यावरणार्थे व्यवहार:।

जीवजगति मानवस्य बुद्धिमत्ता सुविदिता। समाजे यत् पश्यति मानव:, यानि दृश्याणि तस्य दृगगोचराणि भवन्ति तै: तदीया जिज्ञासा स्वाभाविकी भवति। शङ्काकुलं भवति तदीयं मन: विविधप्ररश्ना: जायन्ते तस्य मनसि। स: आत्मानं स्वतन्त्रं मन्यमान: अनावृतं मनुते। परन्तु तस्य चिन्तनं सर्वथा असमञ्जसम् एव। स: प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा वायुना, जलेन, भुवा,वृक्षेण, पतङ्गेन, पर्वतेन वा परिवृत्तो भवति। सकलेन वस्तुजातेन गभीरं प्राभावितं भवति तस्य जीवनम्। अतएव

समाजे मानवेन सह जैविकपदार्थानामजैविकपदार्थानां च सम्बन्धं समाहितं करोति पर्यावरणम्। येन प्रभावितं भवति समग्रं मानवजगत। जीवजगति प्राणिनां प्रकृतिं व्यवहारं जीवनशैलीं च प्रभावयति पर्यावरणम्।

प्रक्रमेऽस्मिन् Douglas and Holland महोदयेनोक्तम्-

The term "environment " is used to describe in the agreegate ,all the external forces , influences and conditions which affect the light ,nature, behaviour and growth.(१)

अतएव पर्यावरणस्य क्षेत्रं विस्तृतम् असीमितम्, अनन्तं च।

विश्वकाषानुसारं पर्यावरणे जीवजगत: सकलदशा: सम्मिलिता भवन्ति। तच्च जीवानामुत्पत्तिं, विकासं, विनाशं च प्रभावयति।

'Environment includes all that conditions, organisations and effects which affect origin, growth and death of any organism.'(२)

किं च-

'Environment is the sum total of all surroundings of outside conditions where a living being or a group resides, or anything remains present there.'(३)

C.C. Park महोदया: निगदन्ति यत्- मानव: यासु परिस्थितिषु अवस्थासु च स्वकीयं जीवनं चालयति तदेव पर्यावरणम्।

'Environment refers to the sum total of conditions which surround man at a given point in space and time.'(४)

संस्कृतसाहित्ये पर्यावरणीया चर्च्चा वहुला। जन्मन: परं मानवस्य प्रकृत्या सह यथा सम्बन्ध: तथा अवस्थानम्। प्रकृतिदत्तसाधनानि तस्य कृते उपहारसदृशानि भवन्ति। अत: मानवस्य विचारे प्रकृति: अलौकिकशक्तिरूपा। प्रकृतिं कल्याणप्रदां विचार्य तस्या: जैविकानि अजैविकानि च तत्त्वानि अनुक्षणं पूजयति मानव:। यथा-

'ॐ मरुद्भ्यो नम:, ॐ अद्भ्यो नम:, ॐ वनस्पतिभ्यो नम:, ॐ दिवारचरेभ्यो नम:, ॐ भूतेभ्यो न:, ॐ नक्तंचारिभ्यो भूतेभ्यो नम:, ॐ सर्वात्मभूतये नम:'।।५।।

प्रसङ्गेऽस्मिन् यजुर्वेद: निगदति यत्-मानव: सर्वेषु प्राणिषु मित्रवदाचरणं कूर्यात्। येन तै: सह तस्य सम्बन्ध: दृढतर: स्यात्। अतएव मानव: पर्यावरणस्य, पर्यावरणं च मानवस्य मित्रं भवति।

**'मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्ष्ये, मित्रस्य चक्षुषा समीक्षामहे'।।६।।**
अथर्ववेद: पर्यावरणमित्थं परिभाषते यत् यस्यां भुवि नदीसमुद्रतडगानां सदभाव:, धान्यादीनां शस्यानामुपलब्धि:, यत्र स्थावरजङ्गमादय: प्राणिन: सन्ति सैव भू: पेयं जलम्, भोज्य पदार्थान् च प्रददातु।

'यस्यां समुद्र उत सिन्धु रापो
यस्यामन्नं कृष्टय: सम्वभूवु:।
यस्यामिदं जिन्वति प्राणदेजत
सा नो भूमि: पूर्वपेये दधातु'।।७।।

भारतीयसंस्कृतौ येषु जलाकाशादिषु देवत्वकल्पितमस्ति तेषु सर्वा: क्रिया: मानववदारोपिता सन्ति। एतेन सर्वाणि प्राकृतिकोपादानानि मानवजगत: न कथञ्चिद भिन्नानि। यत: तानि सर्वाणि मानवस्य विपर्ययेषु साधनत्वेन परिकल्पितानि। अत: मानव: कस्यापि प्राकृतिकतत्त्वस्य संरक्षणाय प्रयतते। अत: भारतीयविपश्चिद्भि: पर्यावरणं जीवजगत: अभिन्नमङ्गीकृतम्। तत्र सांख्यकारिकायां ईश्वरकृष्णेन प्रकृति: इत्थं परिभाषिता-

**'सत्वरजस्तमसां साम्यावस्था प्रकृति:'।।८।।**
आधुनिकसंस्कृतविद्वद्भिरपि पर्यावरणं परिभाषितुं प्रयत्न: विहित:।
तत्र अभिराज राजेन्द्रमिश्रेण-

'लोक आव्रियते येन परितोऽपि प्रविस्तर:।
तदेव पर्यावरणं प्रेक्षावदभि: समुच्यते'।।९।।

बालकृष्णशर्मणा इत्थं परिभाषितम्-
'अस्मान् परितो यदावरणं तदेव पर्यावरणपदेन संज्ञायते'।।१०।।
किञ्च- 'प्रकृतेर्वितानमिदं वृहत्पर्यावरणम्' इति चन्द्रकान्ता राय:'।।११।।
पर्यावरणयं त्रिविधम्- (१) अजैविकम् (भौतिकं) पर्यावरणम्, (२) जैविक पर्यावरणम्,(३)
सामाजिकं पर्यावरणम्। तत्र भौतिकपर्यावरणे वायो: जलस्य, भुव:, ध्वने:, उत्तापस्य, प्रकाशस्य नदीनां , पर्वतानां, खनिजपदार्थानां, विकिरणस्य च अध्ययनं विधीयते।
जैविकपर्यावरणे समेषां जीवानां परिगणनं भवति। जीवानां पारस्परिकसम्बन्ध:, वैरञ्च पर्यावरणस्य सन्तुलने प्रदुषणे न कारणद्वयं भवत:।
सामाजिकपर्यावरणे सामाजिक-आर्थिक-सांस्कृतिक-राजनैतिक-आध्यात्मिकक्षेत्रेषु मानवीयोपलब्धिनां, तेषां विकासस्य पतनस्य च कारणानि समाहितानि भवन्ति।
पर्यावरणस्यावश्यकता का? इति विषये चर्च्चा नितरामपेक्षते। मानव: यदा जन्म लभते। प्रकृत्या: क्रोडे च वर्धते तदा-प्रकृति: तस्य कृते सकलसाधनानि सृजति। मानवोऽपि अनुक्षणं प्रकृतिरपि जीवशृङ्खलां गतिशीलां विदधाति।
पर्यावरणस्य पञ्चतत्त्वानि भवन्ति। तानि -जैवमण्डलम्,जलमण्डलम्, वायुमण्डलम्, स्थलमण्डलम्, सौरमण्डलम् न। स्थलमण्डलं सर्वेषां जीवानां निवासस्थानं भवति। तेषां पोषकतत्त्वं अन्नं स्थलमण्डलात् प्राप्यते। तस्य अध: सुवर्णं, रत्नानि। रजांसि, पाषाणानि च सन्ति। अतएव सैव पृथ्वी सर्वोपयोगिनी भवति। पृथिवी धनदा दिव्यस्वरूपा। सकलखनिजाद्रव्याणां धारयित्री पृथिवी स्वीयसंसाधने जीवान् उपकरोति।
सा च विविधौषधिभि: शारीरिकीं मानसिकीं च व्याधिं दूरीकरोति। विषयेऽस्मिन् चरकसंहितायामुक्तमस्ति।

'तत्र भूमियरीक्षा.............।
........कल्पेषु भूमिपरीक्षा वक्ष्यते'।।१२।।

जीवनधारणाय यथा वायु:, प्रमुखाधारत्वेन परिकल्प्यतेतथा जलमप्यत्यन्तं गुरुत्वपूर्णम्। तदेव पर्यावरणस्यैकमजैविकं तत्त्वम्। यत् जलं प्राणिभि: प्राणरूपेण धायते तत् सर्वथा समेषां कृते उपयोगी भवति।

प्राणिमात्रेण लोकेऽस्मिन् प्राणत्वेनावधार्यते।
जलं सर्वोपयोगित्वाज्जीवनं तृप्तिदं स्मृतम्।।१३।।

छान्दग्योपनिषदि जलस्य व्यापकता वर्णिता अस्ति। जलं जीवनमिति सर्वै: ज्ञातम्। मेघ: जलस्यैकं प्रमुखं स्रोत:। सर्वे प्राणिन: जलात् सम्भवन्ति। वृष्टि: जलस्य जनयित्री। बृष्टि: यज्ञाद भवति। यज्ञोऽपि कर्मण: जायते। महाकवि: कालिदास: मेघोत्पत्तिप्रकारं वर्णयन् कथयति-

धूमज्योति: सलिलरुतां सन्निपात: क्व मेघ:।।१४।।

जलं प्राणा:, जलममृतम्, जलमौषधय: भवति। तत: स्वभावेन पवित्रम्। अत: तत सकलदोषान् निवारयति। मेघदूते जलस्य महत्त्वविषये बहुचर्च्चितमस्ति। जलं सन्तप्तानां हितकारकम्। तदेव प्रशाम्यति वनोपप्लवम्। मेघदूते जलस्य महत्त्वम्-
१) सन्ताप्तानां त्वमसि शरणम्........ (१५)
२) त्वामासारप्रशमितवनोपप्लवं........(१६)
३) तं चेद वायो सरति............ (१७)
४) त्वय्यायत्तं कृषिफलमिति........ (१८)

जल-स्थल-वायुमण्डलेषु विचरन्त: सर्वे जीवा: जैवमण्डले समाहिता भवन्ति। मानवा:, पशव:, पक्षिण:, वनस्पतयश्च जीवत्वेन परिगणिता भवन्ति। समग्रं जैवमण्डलमजैविकतत्त्वानामुपरि निर्भरशीलं भवति। जीवनशृङ्खलायां जैवमण्डलमजैवमण्डलं च परस्परमपेक्षेते। प्राणिषु अन्तर्निर्भरता सततं वरिवर्त्ति। जैवमण्डलेन जीवानां निर्भरशीलत्वं सुस्पष्टम्। अस्मिन् विषये अभिज्ञानशाकुन्तलं निगदति-

क्षौमं केनचिदिन्दुपाण्डुतरुणामाङ्गल्यमाविष्कुतं
निष्ठ्यूतश्चरणोपभोग सुलभो लाक्षारस: केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्दिभि:।।१९।।

यदा शकुन्तला पतिगृहं गन्तुमुद्यता तदा तपोवनस्य वृक्षा: शकुन्तलायै विविधाभरणानि प्रदत्तवन्त:। सूर्यस्य महत्ता संस्कृतसाहित्ये उद्गीता अस्ति। अथर्ववेदे सूर्यस्य सृष्टे: केन्द्रत्वं पोषकत्वं च प्रतिपादिते स्त:। तस्य दिव्यता महती। स: ग्रहमण्डले स्थित: सन् तदेव नियन्त्रितं करोति।

**कालिदाससाहित्ये पर्यावरणप्रदूषणम्-**
अस्मिन् परिवर्तनशीले संसारे न किमपि वस्तु स्वीयमूलरूपे चिरमवतिष्ठते। कारणं तत्र समयस्य गतिशीलता तथा प्रकृते: सन्तुलनत्वम्। प्रदूषणं नाम पर्यावरणीयघटकानां परिवर्तनम्। किमपि वस्तु यदा केनापि कारणेन स्वविशुद्धरूपेण सदुपयोगि न भवति अथ च विकृतिपूर्णं भवति तदा तत् जनसंसदि प्रदूषणरूपेण स्थानं लभते। इदं प्रदूषणं द्विविधं भवति। प्राकृतिकं मानवकृतं च। प्राकृतिकजल प्रदूषणस्य बहूनि उदाहरणानि लभ्यन्ते कालिदाससाहित्ये। जलमध्ये पत्राणां पतनेन तत् प्रदूषितं भवतीति उक्तमस्ति अभिज्ञानशाकुन्तले।
यथा-

'पत्रसंकरकषायाणि कदुष्णानि गिरिनदीजलानि पीयन्ते'।।२०।।
यथा- 'वायुं समाश्रित्य वर्तन्ते सर्व जन्तवः'।।२१।।

इत्युक्तिः चरकस्य वायोः महतां सूचयति। सः वायुः जीवानामुत्पत्तेः विनाशस्य च कारणम्। तस्य चाव्ययत्वं सूक्ष्मत्वं सर्वव्यापित्वं च स्वीक्रियते। विविधधूमानां मिलनेन वायुः जायते। तदर्थं धूमानामनुपातः निश्चितोऽस्ति। यदि मानवीयकारणात् धूमानामनुपातः विकृततामेति तर्हि वायुः प्रदूषितः सन् जीवानां हानिं साधयति। मानवकृतप्रदुषितवायुना जीवाः अजीवाश्च विविधदुष्परिणामान् भुञ्जन्ति। किञ्च प्रकुपितो वायुः रूपान्तराणि धारयति। सः विध्वंसते समग्रं जीवजगत। वायुप्रदूषणेन जीवानामजीवानां च वर्णः परिवर्तते। रजोमिश्रितधूमाधिक्यात् वृक्षाणां पत्राणि मूलवर्णं विपरिवर्तन्ते इति कथितं कालिदासेन।

**'भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन'**।।२२।।
रजोधूमयोः आधिक्ये दृष्टिप्रसारः वाधितो भवति। कुमारसम्भवे दृष्टिवाधस्य दृश्यं सुचितमस्ति। तत्र युद्धयात्राकाले उत्थितैः रजोभिः सर्वेषां लोचनानि अन्धकारच्छन्नानीव जातानि। यथा-

नोर्ध्वं न चाधो न पूरो न पृष्ठतो
न पार्श्वतोऽभूत्खलुचक्षुषोर्गतिः।
सूच्यग्रभेद्यैः पृतनारजश्चयै
राच्छादिता प्राणिगणस्य सर्वतः'।।२३।।

ध्वनिप्रदूषणस्यानेकानि कारणानि सन्ति। यथा जनसंख्या अनुदितं वर्धते तथा ध्वनिप्रदूषणमनुदितं वर्धते। मुख्यतया ध्वनिप्रदूषणस्याधारद्वयं भवति। प्राकृतिककारणैः उत्पन्नाः तीव्रध्वनयः ध्वनिप्रदूषणस्य स्रोतांसि भवन्ति। मानवीयकारणानि ध्वनिप्रदूषणस्य स्पष्टानि। ध्वनिप्रदूषणेन विशेषरूपेण श्रवणेन्द्रियाणि प्रभावितानि भवन्ति। येन श्रुतिशक्तिः क्षीणतामेति। प्राणिनां शारीरिकविकृतिर्जायते। ध्वनिप्रदूषस्य प्रभाव इत्थं वर्णितः कालिदासेन। तत्र स्तब्धता ध्वनिप्रदूषणस्य प्रमुखं कारणमिति वर्णितं कुमारसम्भवे-

'गम्भीरभेरिध्वनितैर्भयङ्करै
र्महागुहान्तप्रतिनादमेदुरैः।
महारथानां गुरुनेमिनिः स्वनै–
रनाकुलैस्तैर्मृगराजताऽजनि'।।२४।।

उर्ध्वश्वासस्य ध्वनिप्रदूषणं कारणमिति सूचयन् कविः लिखति-

उद्दामदानद्विपवृन्दवृंहितैर्नितान्तमुत्तुंगतुरंग ह्रेषितैः।
चलद्घनस्पन्दननेमिनिःस्वनैरभून्निरुच्छवासमिवाकुलं जगत्।।२५।।

अत एव मानवजीवनं सहर्षं, सहजं, सरलं, निर्वाधं विधातुं पर्यावरणसंरक्षणं नितान्तमावश्यकम्। संरक्षणं पदस्यार्थाः प्रक्षणं, संधारणम्, उत्तरदायित्वम्, नियन्त्रणं च। संरक्षण शब्दस्य पाश्चात्यपरिभाषासु ''आलि'' महोदयानां परिभाषा गुरुत्वपूर्णा। तन्मतानुसारं जनिष्यमाणानां वर्त्तमानकालिकानां कृते त्याग एव संरक्षणम्।

Preservation is the sacrification by present generation for future generation.

संस्कृतसाहित्ये संरक्षणमित्थं परिभाषितमस्ति। यथा-

अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्धयेद्वृद्ध्या वृद्धं पात्रेषु निक्षिपेत्।।२६।।

मानवः सामाजिकः विवेकवान् इति कृत्वा सततं वर्त्तमानं भविष्यं च चिन्तयति। सकलस्वकीयमनोभिलाषान् सफलीकर्तुं नितरां प्रयतते। निर्जीवैः सह सम्बन्धं दृढीकरोति। तत्र सजीवनिजीवयोर्मध्ये सम्बन्धः अन्योन्याश्रितताधारेण प्रतितिष्ठति। यतः मनुष्यस्यार्थिकसमृद्धेः आधारः शुद्धं पर्यावरणम्। सः जन्मन आरम्भ मरणं यावत् येषां प्राकृतिकोपादानानां द्वारैव तस्य कार्याणि साधयति, तेषां पर्यावरणीयतत्वानां संरक्षणं समेषां कर्त्तव्यम्। तत्र कालिदासेन उज्जयिनीस्थविपणीनां समृद्धिवर्णनद्वारैव उज्जयिनीवासिनां क्रयविक्रयक्षमत्वं वर्णितम्। तत्र मेघदूते-

हारास्तारांस्तरलगुटिकानकोटिशः शङ्खशुक्तीः
शस्पश्यामान्मरकतमणीनुन्मयुखप्ररोहान्।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान्
संलक्षन्ते सलिलनिधयस्तोयमात्रावशेषाः।।२७।।

इत्थमुपरिलिखिप्रबन्धे कालिदाससाहित्ये पर्यावरणीयतत्वानि सूचितानि।

**सहायकग्रन्थाः**


१. Quoted from - पर्यावरणशिक्षा-आर.ए.शर्मा-पृ.३.
२. Quoted from - पर्यावरण शिक्षा के नए आयाम्.पृ.४.
३. Quoted from - पर्यावरण शिक्षा के नए आयाम्.पृ.५.
४. Quoted from - संस्कृत सहित्य में पर्यावरण-रत्नाशुक्ला.पृ.४.
५. योगसन्देशः-अङ्क-पृ.५२.
६. यजुर्वेदः -३६/१८.
७. अथर्ववेदः - १२, पृथिवीसूक्त।
८. सांख्यकारिका-सूत्र.६१.
९. राष्ट्रियसंगोष्ठी-४.११.२०११, संस्कृतविभागः, सागरविश्वविद्यालयः।
१०. राष्ट्रियसाहित्य एवं पर्यावरण-पृ.२६१.
११. भारतीमन्दार -पृ.२६.
१२. चरकसंहिता - भाग - ९, पृ. ८/९३.
१३. संस्कृतवाङ्मये जलविज्ञानम्- श्रीकृष्णस्य सेमवान् - पृ-१.
१४. मेघदूतम् - (पूर्वमेघ) श्लो. - ५.
१५. मेघदूतम् - (पूर्वमेघ) - श्लो -७.
१६. मेघदूतम् - (पूर्वमेघ) - श्लो -१७.
१७. मेघदूतम् - (पूर्वमेघ) - श्लो -५७.
१८. मेघदूतम् - (पूर्वमेघ) - श्लो -५१६.
१९. अभिज्ञानशाकुन्तलम्- ४/५.
२०. अभिज्ञानशाकुन्तलम्- अङ्क-२.
२१. चरकसंहिता - १३/८.
२२. अभिज्ञानशाकुन्तलम् - १/१५.
२३. कुमारसम्भवम् - १४/३८.
२४. कुमारसम्भवम् - १४/२७.
२५. कुमारसम्भवम् - १४/४१.
२६. मनुस्मृतिः - ७/१०१.
२७. मेघदूतम् - (पूर्वमेघ) - श्लो-३३.